# भोजपुरीवाग्विश्लेषणे पाणिनेरवदानम्

सत्येन्द्रपाण्डेयः*

pandeysatyendra80@gmail.com

***सारः***

*भाषामात्रविश्लेषणे पाणिनीयव्याकरणस्य महत्त्वं प्रायः सर्वे पौर्वात्यपाश्चात्यभाषाशास्त्रिणः विद्वांसः समानस्वरेण स्वीकुर्वन्ति। प्रकृतशोधनिबन्धे भोजपुरीवाचि प्रचलितानां शब्दानां पाणिनिरीत्या प्रकृति-प्रत्ययानां निर्देशनेन एकं तथ्यान्वेषणं कृतं वर्तते, यद् भोजपुरीवाचः विश्लेषणे पाणिनिव्याकरणस्य का भूमिका भवितुं शक्नोति? उपक्रमेऽस्मिन् कृत्तद्धित-समासैकशेष-सनाद्यन्तधातुरूपासु पञ्चवृत्तिषु आदितः तिसृणां वृत्तीनां भोजपुरीवाचि कथं प्रयोगो भवतीति दर्शयित्वा पाणिनिव्याकरणानुमता भोजपुरीवाग्विश्लेषणस्य एका पद्धतिः सङ्केतिता वर्तते।*

**कूटशब्दाः** भोजपुरी, पाणिनिः, वाग्विश्लेषणम्

भाषाणां वंशपरम्परादृष्ट्या भोजपुरीवाचः संस्कृतस्य च सम्बन्धः प्रमातामही-प्रनेप्त्रीवत् वर्तते। 'संस्कृतम्' प्रथमसोपानस्य भाषा वर्तते चेत् 'भोजपुरी' तस्य चतुर्थसोपाने आगच्छति। अत एतयोः द्वयोरपि सम्बन्धः साक्षादपेक्षया पारम्परिकः अधिकोऽस्ति। भाषावैज्ञानिकानां कालक्रमानुसारम् इदानीं यत्र 'भोजपुरी' भाषमाणा वर्तते, तत्र अद्यतः प्रायः सार्द्धद्वि-त्रि सहस्रवर्षपूर्वं संस्कृतभाषा व्यवहृता आसीत्। सैव कालान्तरे 'मागधीप्राकृत' रूपेण विकसिता। अथ चैषाऽपभ्रंशरूपतां धारयन्ती स्थानभेदवशाद् भोजपुरी-मैथिली-बंगला-उड़िया-असमीत्यादिभाषारूपेण विकसिता बभूव।

'भोजपुरीवाक्' बिहारीसमूहस्य मगही-मैथिली-भोजपुरीति भाषात्रयस्यान्तर्गतास्ति [1] तथैतस्याः मूलं 'मगही' वर्तते। कदाचित् राजपुत्राणाम् अत्यन्तं प्रथिते राज्यक्षेत्रे भोजपुरे प्रचलितत्वात् अस्याः नाम भोजपुरी बभूव। एतस्याः क्षेत्रं बहुविस्तृतं व्यापकञ्च वर्तते।[2] उत्तरप्रदेशस्य पूर्वभागे बिहारस्य च पश्चिममध्योत्तरभागेषु भोजपुरीभाषायाः प्रयोगो भवति। अस्मिन् क्षेत्रे- उत्तरप्रदेशस्य वाराणसी-गाजीपुर-बलिया-मिर्जापुर-

---

* शोधच्छात्रः, श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-१६

1 वस्तुतः बिहारी कोई भाषा नही है। यह बिहार प्रान्त मे बोली जाने वाली भाषाओं के समूह का नाम है। इसमे प्रमुख भाषाएँ हैं-भोजपुरी, मैथिली, और मगही, भाषा विज्ञान एवं भाषाशास्त्र, डॉ० कपिलदेवद्विवेदी, पृ०-४४४

2 जर्नल ऑफ् रॉयल एशियाटिक सोसायटी, जॉन बीम्स,, भाग-३ सन्-१८६८ पृ०-४८३-४८५

जौनपुरस्याधिकांशक्षेत्रम्, गोरखपुर-देवरिया-आजमगढ़ तथा फैजाबादस्य किञ्चित्क्षेत्रम्, बस्तीजनपदस्य हरैया कुवानो नदीं यावत्, अथ च पश्चिमबिहारस्य भोजपुर-भभुआ-रोहतास-छपरा-सिवान-गोपालगंज-राँची-पलाम्वाः कश्चिदंशः, तथा सासाराम-चम्पारन- मुजफ्फरपुरजनपदानां पश्चिमोत्तरकोणं यावद् आगच्छति।

किञ्च अष्टादशशताब्द्यां पूर्वोक्तादस्मादेवक्षेत्राद् मॉरीशस, सूरीनाम, ट्रिनीडाड, गुआना तथा फीजीप्रभृतिदेशेषु प्रव्रजितैः जनैः सह एषा भाषा ऐतेषु देशेष्वपि गता इदानीम् उक्तदेशेषु न केवलमियं व्यवह्रियते, अपितु राज्यसंरक्षणं प्राप्य संरक्षिता सती समृद्धिमाप्नोति।

भाषाणां सम्बन्धे एकं वैज्ञानिकं तथ्यमिदमस्ति यत् सा स्थानभेदेन कालभेदेन च निरन्तरं परिवर्त्तमाना भवति। तथापि यथा चेतनप्राणिषु सोपान-गतपरिवर्तनानां विद्यमानत्वेऽपि केचन वंशानुगताः गुणाः निरन्तरं चाल्यमानाः भवन्ति। तथैव परिवर्तितभाषास्वपि पूर्वभाषाणां मौलिकाः गुणाः, नियमाः नूनमेव आगच्छन्ति। भोजपुरी भाषायाः मूलमपि संस्कृतं वर्तते। अतो भाषायामस्यां संस्कृतभाषायाः अन्तर्निगूढाः गुणाः व्याकरणप्रणाली च मूलरूपेण विराजमाना अस्ति। संस्कृतभोजपुरीवाचोः शब्दनिष्पत्तिप्रक्रियायां तुलनात्मकं दृष्टिपातं कुर्मश्चेत् प्राप्नुमो यत् पाणिनीयव्याकरणे ये प्रत्ययाः यस्मात्प्रकृतेः यस्मिन्नर्थे विहिताः ते 'तत्सम' शब्देषु तु प्राप्यन्ते परं तद्भव-देशज-विदेशजशब्देषु सर्वथा परिवर्तितरूपे उपलभ्यन्ते। यतोऽहि अत्र प्रकृतिरपि परिवर्तिता प्रत्ययोऽपि परिवर्तितो भवति, फलतः अर्थमात्रसाम्यत्वेनात्र प्रकृतिप्रत्ययोः परिकल्पना भवति।

तथ्यमिदं मनसि निधाय भोजपुरीवाचि पाणिनिसम्मतानां यथोपलब्धानां कृत्तद्धित-समासैकशेष-सनाद्यन्तधातुरूपाणां प्रयोगान् निबन्धेऽस्मिन् अन्वेषयामः।

पाणिनिना पंचवृत्तयः पदविधित्वेनाङ्गीकृताः स च पदविधिः समर्थाश्रितस्यैव भवेयुरिति "समर्थः पदविधिः"[3] माध्यमेन संस्थापिता। अतएव 'राजपुरुष' इत्यत्र राज्ञोऽपि पदम्, पुरुषोऽपि पदं तथा चैतयोः द्वयोरपि पदयोः एकपदीभवने सामर्थ्यमपि अस्ति। अतः समासरूपो पदविधिरत्र जायते। तथैव भोजपुरीवाचः पदविधिष्वपि पाणिनिसम्मत- समर्थतायाः शत-प्रतिशतं दर्शनं जायते। अतएव नृत्यतीति नचनियाँ, वादयतीति बजनिया भवति, नचनिया-बजनिया इत्युभयोः पदयोः सम्मिल्य नचबजनिया आदि न भवति, समर्थाभावात्। अतो भोजपुरीवाचः पदसम्बन्धिविधित्वेऽपि पाणिनेः सूत्रमिदं परमोपयोगि मार्गदर्शकञ्च भविता।

## 1. कृदन्तप्रयोगाः -

पाणिनीमते धात्वधिकारे विहिताः तिङ् भिन्नप्रत्ययाः कृत्संज्ञकाः भवन्ति। "कर्तरि कृदि"[4]ति निर्देशेन कृत्प्रत्ययाः सामान्यतया कर्तरि एव भवन्ति, परं 'तयोरेव कृत्य०[5]' 'करणाधिकरणयोश्च'[6] 'कृत्यल्युटो०'[7] इत्यादि

---

3 अष्टाध्यायी, पाणिनी, सूत्र सं०-२/१/१

4 तत्रैव, ३/४/६७

निर्देशात् एते विभक्तिमात्रेषु दृश्यन्ते। संस्कृतमिव भोजपुरी वाचि अपि विभिन्नार्थककृदन्तशब्दानां बाहुल्यं वर्तते। यथा- नृत्यतीति नर्तक इव नचनियाँ, वादयतीति 'बजनिया' गवैया, खेवइया, देखवइया अत्र कर्तरि 'अइया' प्रत्ययः, तथैव लडाकू-पढाकू= 'आकू', फक्कड, घुमक्कड, भुलक्कड, पिअक्कड= 'अक्कड', ठठेरा-लुटेरा= 'ऐरा', करनिहार-देनिहार-देखनिहार= 'अनिहार', कटाह- खिसिआह= 'आह' कर्तरि प्रत्ययाः एते। एतादृशमेव कथ्यते या सा 'कहनी' ध्रायते या सा 'सुँघनी' कर्मण्यत्र 'नी' प्रत्ययः।

अन्यच्च- खटाई-पिटाई= आई, ढलान-थकान= आन्, घुमौवल= औवल, भिडन्त= अन्त, झगडा-फेरा= आ, ऐंठन= अन्, छिडकाव-पडाव= आव, भडास= आस्, घुडकी= ई, छँटनी= नी आदयः भावार्थककृत्प्रत्ययाः। एतदतिरिक्तं वर्तमानकालिकार्थे कृदन्तीयः 'शतृ' प्रत्ययसदृश 'अत' प्रत्ययस्य प्रयोगो दृश्यते। यथा- आवत-गावत-लेत-देत-उठत-बैठत आदि। भूतार्थेऽपि क्तवतुसदृशः 'लन' प्रत्ययस्य प्रयोगः भवति। वर्तमानार्थकः शतृसदृशः अत् प्रत्ययस्य सौन्दर्यमत्र सवइया छन्दसि द्रष्टुं शक्यते-

लागत कोइ गोहारि न बा, खडे ठाकुर एक से एक सगोती
आँखि तरेरत बाटई दुसासन, बाज लखइ जस सूधी कपोती।
तोरे बिना कोइ सूझत ना, तनी ठोंकि के छाती सकारू चुनौती
द्वारिका ओर किहें मुँह द्रौपदी ढारत मोती, निहारत धाती।।[8]

अत्र 'आँखि तरेरत' 'ढारत मोती' निहारत धोती' अत्र 'अत्' प्रत्ययस्य कियान् सुन्दरतमः प्रयोगो वर्तते। 'ठोंकि के' अत्रापि पूर्वकालिक अर्थे क्त्वा सदृशः 'इ' प्रत्ययोऽस्ति।

## 2. तद्धितप्रयोगाः -

धातुमतिरिच्य प्रातिपदिकात्विहिताः सुब्भिन्नप्रत्ययाः तद्धितसंज्ञकाः भवन्ति। एते क्रियां विहाय संज्ञा-सर्वनाम-विशेषणशब्दैः सह सम्पृक्ताः भवन्ति। पाणिनीयव्याकरणे तद्धितप्रत्ययाः अपत्यार्थे, रक्ताद्यर्थे, चातुरर्थिके, शैषिकार्थे, प्राग्दीव्यतीयार्थे, भावकर्माथयोः, भवनाद्यर्थके, मत्वर्थीये, विभक्त्यर्थे, स्वार्थाद्यर्थेषु च जायन्ते।

---

5 तत्रैव, ३/४/७०

6 तत्रैव,३/३/११७

7 तत्रैव, २/१/३२

8 द्रौपदी, चन्द्रशेखरमिश्र

भोजपुरीवाचि तद्धितान्तशब्दानामन्वेषणं क्रियते चेत् विविधार्थकाः प्रत्ययाः तत्राप्यवलोक्यन्ते। यथा- 'बभनइया' अत्र 'ब्राह्मणानां निवास' इति व्युत्पत्तौ 'सोऽस्यनिवासः'[9] इत्यर्थे 'अइया' प्रत्ययः। पियरी-पियरका, हरियरी-हरियरका अत्र 'तेन रक्तंरागादित्यर्थे' 'ई', 'का' प्रत्ययः, गँवार- अत्र 'ग्रामे जातः भवः' इति शैषिकार्थे 'आर' प्रत्ययः। बिहारी- बंगाली-चैती-अगहनी-फगुनी इत्यादिष्वपि सोऽस्यनिवासः तत्र जातः भव वेत्यर्थे 'ई' प्रत्ययः, पूर्वइया-पछुवा, अगिला-पछिला-मँझिला अत्रापि तत्र जातः तत्र भव इति शैषिकार्थे इया, उवा, इला प्रत्ययाः सन्ति। दोसर-तिसर अत्र पूरणार्थे तीय प्रत्यय सदृश 'सर' प्रत्ययः, इहाँ-इहवाँ-कहाँ-कहवाँ इत्यादिषु सप्तम्यर्थे प्राग्देशीय 'त्रल' इव आ, अवा प्रत्ययौ स्तः। तुन्दः अस्ति अस्य 'तोनइल' अत्र मतुबर्थे 'अइल' प्रत्ययः भारी-परवेरू-दुधारू- बजारू-देहगर-पनिगर-गठरी-मोटरी इत्यादिष्वपि मत्वर्थीये 'ई' 'एरू' 'आरू' 'गर' प्रत्ययाः सन्ति। रोगिआह-बहुराह-बडहन-छोटहन इत्यादिषु अयम एषु अतिशयेन इत्यर्थे आह, हन प्रत्ययौ स्तः। महुअर-तिसौरी इत्यत्र दध्ना संसृष्टं दाधिकमिव संसृष्टार्थे अर औरी प्रत्ययौ स्तः। तद्धितान्तशब्दानां निदर्शने भोजपुरीकवि 'मोती बी.ए.' महोदयस्य 'महुआबारी में बहार' गीतं द्रष्टुं शक्यते-

असो आइल महुआबारी में बहार सजनी - २
संइया खातिर बारी धनिया महुअर पकावेली
केहू बनिहारे खातिर तावा पर ततावेली
महुआ बैल प्रेम से खावें
गाड़ी खींचे, जोत बनावें
ई गरिबवन के किसमिस अनार सजनी- असो.....[10]

अत्र 'महुआबारी' इत्यस्मिन् पदे 'महुआ अस्ति अस्येति' मत्वर्थीये बारी प्रत्ययः, 'महुवर' इत्यत्र संसृत्यार्थे अर प्रत्ययः, बनिहार इत्यत्रापि बनिकृते यः श्रमं कुरूते इत्यर्थे हार प्रत्ययः वर्तते, 'गरिबवन' इति बहुवचनान्त प्रयोगः।

## 3. समासप्रयोगाः -

समसनं संक्षेपीकरणं अर्थात् अनेकपदानां एकपदीकरणं समासः कथ्यते। अत्र द्व्याधिकपदानां परस्परसम्बन्धवाचकानां शब्दानां प्रत्ययाणां वा लोपे सति द्व्याधिकैः शब्दैः एकस्य स्वतन्त्रशब्दस्य (पदस्य)

9 अष्टाध्यायी ४.२.८९

10 पुरईन पात, पृ०-२९

निर्माणं भवति। पाणिनीयव्याकरणे अव्ययीभाव-तत्पुरुष- कर्मधारय-द्विगु-द्वन्द्व-बहुव्रीहिभेदेन षड्विधः समासः विवेचितः। एतेषां समासानामुदाहरणं भोजपुरीवाचि अनायासेनान्वेष्टुं शक्यते। तद्यथा-

अव्ययीभावः- प्रायेण पूर्वपदस्याव्ययत्वे प्रधानत्वे चाव्ययीभावः। यथा- भरपेट, बेमतलब, निधडक, अधकपारी, अधपाकल, अधकचरा, आदयः।

तत्पुरुषः- प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः पूर्वपदस्यात्रलुप्तविभक्तिकत्वेनैतस्य कर्मकरणादि-तत्पुरुषनामकरणम्- करजोर, मुँहतोड, कुलबोरन, लकडसुँघवा, कनफुकवा, हाडिफोरवा, आदिषु कर्म त०। मुँहमाँगल, मुंहचोर, भुखमरी, धर्मभीरू, मुखदुब्बर इत्यादिषु करण त०। पाकिटखर्च, शिवाला, रसोईघर, धनशोक- सम्प्र० त०। लोकलाज, अमरस, गुरूसेवा, ठाकुरवाडी, तेलहन (तिलान्न), राजपूत, राजदरबार, घरघूसना, फेडचढवा, घुडसवार- अधि० त०।

कर्मधारयः- पूर्वोत्तरपदयोः विशेष्य-विशेषणभावे उपमानोपमेयभावे वा सति उत्तरपदस्य प्राधान्ये कर्मधारयः, यथा- साँवरि-सूरत, मोहिनी-मूरत, अँजोरिया रात, काँच-कसईली, फूटल-किरिनिया आदि।

द्विगुः- पूर्वपदस्य संख्यावाचकविशेषणत्वे द्विगुः, यथा- नौमन, चवन्नी, पसेरी, चौराहा, सतसई आदयः।

(२) बहुव्रीहिः- अन्यपदार्थप्रधानो बहुव्रीहिः, यथा- दुधमुँहा, मिठबोल, कनकट्टा, गलफुल्ला, झोंटा-झोंटी आदयः।

(१) द्वन्द्वः- उभयपदार्थप्रधानो द्वन्द्वः, यथा- माई-बाप, बुरा-भला, भात-दाल, बहिन-बेटी, खरी-खोटी, आदयः।

'रामजियावन दास बावला' इत्यस्य 'गाँव क बात' कवितायां कर्मधारयसमासस्य प्रयोगो दर्शनीयः -

लमकी तरोई लतराय खँड़हरवा में, बँड़वा में बोड़वा क बढ़त बिरउवा।
चढि रेड़वरिया पर सेमियाँ गँछइली कि मोछिया मुरेरैला मइइया पै लउवा।।
धार- धार केरवा क कुँइयवाँ प लटकल निबुआ में छोट लगले डिड़उवा।
रघुवा क भुँअरी भँइस नगिचाइल वा, सगुन बतावैल बँड़ेरिया पर कउवा।।[11]

अत्र 'लमकी-तरोई' तथा 'भुँअरी-भइस' कियन्तौ रौचको स्तः।।

11 पुरईन पात, पृ०-३५

## 4. सनाद्यन्तप्रयोगाः -

सनाद्यन्तवृत्तौ सन्-क्यच्-काम्यच्-क्यङ्-क्यष्-आचारक्विब्-णिज्-यङ्-यक्- आय्-इयङ्-णिङ् चेति द्वादश प्रत्ययान्तानां शब्दानां निष्पत्तिर्जायते-

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः॥[12]

एतेषु णिजन्तप्रयोगाणां तु बाहुल्यं वर्तते भोजपुरी वाचि कदाचित् सन्नन्तस्यापि प्रयोगः अवलोक्यते। यथा- पातुमिच्छुः पियासल, भोक्तुमिच्छुः भुखासल, कवयितुमिच्छुः कवियासल इत्यादिषु सन्नर्थे 'आसल' प्रत्ययो वर्तते।

प्रेरणार्थक-क्रियानिष्पत्यै भोजपुरीवाचि साधारणधातुना सह 'णिच्' सदृशः 'आव' प्रत्ययस्य प्रयोगो भवति। यथा- उठ-उठना - उठाव, छिप-छिपना - छिपाव, मिल-मिलना - मिलाव। द्विगुणित प्रेरणार्थके साधारण धातुना सह 'वाव' प्रत्ययस्य प्रयोगो दृश्यते। यथा- उठ-उठाव - उठवाव, मिल-मिलाव - मिलवाव आदि। कबीरदासस्य भोजपुरीपद्ये प्रेरणार्थक क्रियाया प्रयोगः द्रष्टुं शक्यते-

सूतल रहलौं में नींद भरि हो, गुरू दिहल हूँ जगाई
चरन कवँल कई अँजन हो, नयना लिहलहुँ लगाई।
जनम-जनम केरा पपवा हो, छिन डारबि धोआई
कहले कबीर विचारि के हो, जम देखि डेराई।।[13]

## 5. नामधातुप्रयोगः -

पाणिनीयव्याकरणस्य एका अन्यापि शब्दनिर्माणप्रक्रिया वर्तते यस्यानुकरणेन भोजपुरीवाचि उत्कृष्टाभिव्यञ्जनाशक्तिः समायाति, सा चास्ति नामधातुप्रक्रिया, यथा नाम्नैवावगम्यते यदस्यां नामाः (प्रातिपदिकाः) धातुरूपतामाप्नुवन्ति- यथा कृष्णायते। उदाहरणतया अस्याः सुन्दरतमान् प्रयोगान् द्रष्टुं शक्नुमः- ठेहुनियावल, हथियावल, गरदनियावल, नकियावल, नजरियावल, मुडियाइल, अगिआइल आदयः।

इत्थमुपर्युक्तविवेचनेन सिद्ध्यति यत् भोजपुरीवाण्यां प्रयुक्तानां शब्दानां व्याकरणदृष्ट्या यथातथ्यं निरूपणे पाणिनीयव्याकरणं महत्त्वास्पदं वर्तते। अथ च किम्पुनः आधुनिक- भारतीयभाषाविश्लेषणे मन्मते तु

---

12 सनाद्यन्ताधातवः की टिप्पणी, ल०सि०कौ०, पृ०-८७

13 पुरइन-पात, पृ०-४

भाषामात्रविश्लेषणे पाणिनीया पद्धतिः सर्वोत्कृष्टा भविष्यति। अत एतादृशाय भाषाविश्लेषणविचक्षणाय पाणिनये स्वाभाविकमेव नमस्कारप्रवृत्तिर्जायते-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।। [14]

## 6. निष्कर्षः

मयात्र पाणिनिव्याकरणस्य शब्दनिर्माणप्रकृतेराधारभूतासु पञ्चवृत्तिषु चतसृषु वृत्तिषु भोजपुरीवाचि कीदृशः प्रयोगः जायमानोऽस्तीति गवेषणा विहिता। तासु अन्यतमा या एकशेषवृत्तिः वर्तते, अथ च सन्नन्तणिजन्तौ विहाय सनादिप्रत्ययाः सन्ति। तेषां प्रयोगाः मयि दृष्टौ (बुद्धौ) वा नागता एतेऽपि अनुसन्धेयाः सन्ति।

## 7. सन्दर्भग्रन्थसूची-

1. महतो दामोदर, (पुनर्मुद्रण) 2002. ***पाणिनीयशिक्षा***, मोतीलाल बनारसीदास.
2. शास्त्री गोपाल, 2006. ***पाणिनीयाष्टाध्यायी,*** चौखम्बासंस्कृतप्रतिष्ठान, वाराणसी.
3. नीरन अरुणेश व मिश्र चितरंजन, 2008. ***पुरइन-पात*** (भोजपुरी भाषा-साहित्य की बानगी) विश्वविद्यालय प्रकाशन, वाराणसी.
4. द्विवेदी कपिलदेव, 2003. ***भाषा-विज्ञान एवं भाषाशास्त्र,*** विश्वविद्यालयप्रकाशन, वाराणसी
5. बीम्स जॉन, 1868. ***जर्नल ऑफ़ रॉयल एशियाटिक सोसायटी*** भाग-3
6. त्रिपाठी नारायणदत्त व पाण्डेय रामनारायण, 2008. लघुसिद्धान्तकौमुदी गीताप्रेस गोरखपुर.
7. पाण्डेय गोपालदत्त, 1997. ***सिद्धान्तकौमुदी,*** श्री चौखम्बाविद्याभवन, वाराणसी.

---

14 पा०शि०-५७